# চতুঃশ্লোকীভাগবতম্

{॥ চতুঃশ্লোকীভাগবতম্ ॥}

শ্রীভগবানুবাচ ।

জ্ঞানং পরমগুহ্যং মে যদ্বিজ্ঞানসমন্বিতম্ ।

সরহস্যং তদঙ্গং চ গৃহাণ গদিতং মযা ॥ ১॥

যাবানহং যথাভাবো যদ্রূপগুণকর্মকঃ ।

তথৈব তত্ত্ববিজ্ঞানমস্তু তে মদনুগ্রহাত্ ॥ ২॥

অহমেবাসমেবাগ্রে নান্যদ্যৎসদসৎপরম্ ।

পশ্চাদহং যদেতচ্চ যোঽবশিষ্যেত সোঽস্ম্যহম্ ॥ ৩॥

ঋতেঽর্থং যৎপ্রতীযেত ন প্রতীযেত চাত্মনি ।

তদ্বিদ্যাদাত্মনো মাযাং যথাঽঽভাসো যথা তমঃ ॥ ৪॥

যথা মহান্তি ভূতানি ভূতেষূচ্চাবচেষ্বনু ।

প্রবিষ্টান্যপ্রবিষ্টানি তথা তেষু ন তেষ্বহম্ ॥ ৫॥

এতাবদেব জিজ্ঞাস্যং তত্ত্বজিজ্ঞাসুনাঽঽত্মনঃ ।

অন্বযব্যতিরেকাভ্যাং যৎস্যাৎসর্বত্র সর্বদা ॥ ৬॥

এতন্মতং সমাতিষ্ঠ পরমেণ সমাধিনা ।

ভবান্কল্পবিকল্পেষু ন বিমুহ্যতি কর্হিচিত্ ॥ ৭॥

॥ ইতি শ্রীমদ্ভাগবতে মহাপুরাণেঽষ্টাদশসাহস্র্যাং

সংহিতায়াং বৈযসিক্যাং দ্বিতীয়স্কন্ধে ভগবদ্ব্রহ্মসংবাদে

চতুঃশ্লোকীভাগবতং সমাপ্তম্ ॥

Bhagavatapurana 2.09-30-36

Proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Chatusloki Bhagavatam Lyrics in Bengali PDF
% File name : chatushshlokIbhAgavatam.itx
% Location : doc_vishhnu
% Author : Maharshi Vyas in Bhagavat Purana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA
% Description-comments : From Bhagavatapurana, 2.09-30-36
% Latest update : July 31, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website